## धनहिरण्यात् कामे । (६५/१८६५)

तत्र इत्येव, कन् इति च । धनहिरण्यशब्दाभ्यां तत्र इति सप्तमीसमर्थाभ्यां कामे इत्यस्मिन्नर्थे कन् प्रत्ययो भवति । कामः इच्छा, अभिलाषः । धने कामः धनको [1]देवदत्तस्य । हिरण्यको देवदत्तस्य ॥

## स्वाङ्गेभ्यः प्रसिते । (६६/१८६६)

तत्र इत्येव, कन् इति च । [2]स्वाङ्गवाचिभ्यः शब्देभ्यः तत्र इति सप्तमीसमर्थेभ्यः प्रसिते इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति । प्रसितः प्रसक्तस्तत्परः इत्यर्थः । केशेषु प्रसितः केशकः[3] । केशादिरचनायां प्रसक्त [4]एवमुच्यते । बहुवचनं [5]स्वाङ्गसमुदायशब्दादपि यथा स्यात् । दन्तौष्ठकः । [6]केशनखकः ॥

## उदराद् ठगाद्यूने । (६७/१८६७)

तत्र इत्येव, प्रसिते इति च । उदरशब्दात् सप्तमीसमर्थात् प्रसिते इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । आद्यूने इति [7]प्रत्ययार्थविशेषणम् । उदरेऽविजिगीषुर्भण्यते । यो बुभुक्षयाऽत्यन्तं पीड्यते स एवमुच्यते । उदरे [8]प्रसितः औदरिकः आद्यूनः[9] । आद्यूने इति किम् ? उदरकः (५.२.६६/१८६६) ॥

## सस्येन परिजातः । (६८/१८६८)

कन् प्रत्ययः इत्येव स्वर्यते, [10]न ठक् । निर्देशादेव [11]तृतीयासमर्थविभक्तिः । सस्यशब्दात् तृतीयासमर्थात् [12]परिजातः इत्यस्मिन्नर्थे कन् प्रत्ययो भवति । सस्यशब्दोऽयं [13]गुणवाची । परिः सर्वतो भावे [14]वर्तते । यो गुणैः सम्बद्धो[15] जायते, यस्य किञ्चिदपि वैगुण्यं नास्ति, तस्येदमभिधानम् । सस्येन परिजातः सस्यकः शालिः[16] । सस्यकः [17]साधुः । सस्यको मणिः । [18]आकरशुद्ध इत्यर्थः ॥

## अंशं हारी । (६९/१८६९)

अंशशब्दान् निर्देशादेव द्वितीयासमर्थाद् हारी इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति । अंशं हारी अंशको दायादः । अंशकः पुत्रः । हारी इति आवश्यके णिनिः (३.३.१७०/३३११) । तत्र [19]षष्ठीप्रतिषेधात् कर्मणि द्वितीया एव भवति ॥

---

1. महादेवस्य ड, धनकामः देवदत्तस्य ह. 2. स्वाङ्गविषयवाचिभ्यः ड. 3. दन्तकः नखकः इत्यधिकम्
ब, दन्तकः इत्यधिकम् क. ह. 4. एवम् नास्ति ब. क. 5. स्वाङ्गसमुदायादपि क. ह. 6. दन्तनखकः ह.
7. क्रियाविशेषणम् क. 8. प्रसक्तः ड. 9. निरुद्योगः इत्यर्थः इत्यधिकम् क. 10. न ठक् नास्ति क.
11. तृतीया नास्ति क. 12. सपरिजातः क. 13. धान्यवाची ड. 14. वर्तते नास्ति. 15. सर्वतो इत्यधिकम्
ह. 16. सस्यको वत्सः इत्यधिकम् ब.क.ड. 17. सीधुः क, नास्ति ह. 18. आकरजः ड. 19. अकेनोर्भविष्य–
दाधमर्ण्ययोः इति निषेधात् इत्यधिकम् ड.